न्तव्या ।तत्करणप्रकारः आश्वला० श्रौ० सूत्रे दर्शितो "यथा पौर्णमासेनेष्टिसोमा उपदिष्टाः"। २,१,१, प्रथमेऽध्याये दर्शपूर्णमासौ व्याख्यातौ विध्यन्तरसहितौ। उत्तरत्रेष्टयः पशवश्च वक्ष्यन्ते विध्यन्तरविहिताः। तेषां विध्यन्तरापेक्षास्ति" "अतोऽयमर्थः सूत्रस्य, यस्मिञ्छास्त्रे उपदिष्टा इष्टयः पशवश्चापि अविशेषिताज्यभागास्ते सर्वे वार्त्रघ्नाज्यभागा इति"। "पौर्णमासेनेत्यस्यायमर्थः, पौर्णमासेन व्याख्याता इति वार्त्रघ्नाज्यभागा इत्यर्थः। तेन समाम्नातानामिष्टीनां पशूनाञ्च अन्यदेवतागमभावः सिद्धो भवति। तथा चोक्तमिष्ट्ययनप्रकरणे "असमाम्नातास्वर्थात् तन्त्रविकारः" नारा० वृत्तिः तस्य कालस्तत्रैव दर्शितः यथा "तैरमावास्यायां पौर्णमास्यां वा यजेत" सू० २,१,२, "तैरिष्टिपशुसोमैरमावास्यायां पौर्णमास्यां वा यागः कर्त्तव्य इति इष्टिपशूनां प्रकृतिप्राप्त एवायं कालः पुनर्विधीयते द्व्यहकालतां निवर्त्य सद्यस्कालताप्राप्त्यर्थम्। किञ्च दर्शप्रकृतेरमावास्या पौर्णमासप्रकृतेः पौर्णमासीत्येवं नियमं निवर्त्य अनियमेन उभयकालताप्राप्त्यर्थम्। प्रकृत्यविरोधात् पर्वणस्तद्व्यहोरात्रे विकृतिः कर्त्तव्या। यदाह्नः पूर्वभागे पर्व स्यात् तदा प्रकृतिं कृत्वा विकृतिः कार्या। यदा परभागे रात्रौ वा तदा विकृतिं कृत्वा प्रकृतिः कार्येति सोमस्याप्यप्राप्तः कालो विधीयते। इष्ट्यादिशब्दसम्बन्धादेव यजेतेत्यपि सिद्धे यजेतेतिवचनं सोमस्य याग एवानयोः कालयोः सम्पादनीयो नान्यत् दीक्षादीति" वृत्तिः। "राजन्यस्याग्निहोत्रं जुहुयात्" ३ सू०। "क्षत्रियस्याग्निहोत्रहोमः पर्वणोरेव कर्त्तव्यो नान्यस्मिन् काल इति चशब्दाद्वैश्योऽप्यनयोरेव कालयोरग्निहोत्रं जुहुयात् नान्यस्मिन्नित्यवगम्यते। अत्र विशेषमाह" वृत्तिः। "तपस्विने ब्राह्मणायेतरं कालं भक्तमुपहरेत्" ४ सू०। "तपस्वी कर्मनिरतस्तस्मै ब्राह्मणाय अतपस्विनेऽपि ब्राह्मणायैव दद्यात् न जात्यन्तराय तपस्विनेऽपीति। इतरं कालमिति, इतरेषु सर्वेष्वग्निहोत्रकालेष्वित्यर्थः। भक्तमुपहरेत्, भक्तं पक्वोदनं पक्वान्नमुपहरेत्, दद्यात्। एतदुक्तं भवति। राजन्यवैश्ययोः पर्वण्यग्निहोत्रकालद्वयं वर्जयित्वा इतरेषु कालेषु ब्राह्मणायोदनो दातव्यो न होमः कर्त्तव्य इति। अग्निधारणन्तु क्रियत एव" वृत्तिः। ततोऽग्न्याधानं प्रसङ्गादुक्तं तच्चाधानशब्दे पूर्वं दर्शितम् अग्न्याधानोत्तरं कर्त्तव्यमाह "यदि त्विष्टयस्तनुयुः" २,१,१८, सू० "अग्नीनेवेति वाक्यशेषः। यद्यनधिकारत्वादाधानविधेर्विनियोजकस्य प्रकरणस्य व्यापारा-

सम्भवादाधानाङ्गमिष्टयो न स्युः, इष्टीनाञ्चानधिकारत्वादिष्ट्यङ्गमाधानं न स्यात्, तथापि न कश्चिद्दोषः, अग्न्यर्थत्वेनैवोभयोरप्यनुष्ठानसिद्धेः"। "अस्मिन्नर्थे सूत्रयोजना। यद्यासामिष्टीनामाधानाङ्गता स्यात् तथापि आहवनीयाद्यग्निसम्बन्धात् तानेवाग्नीनिष्टयस्तनुयुः विस्तारयेयुः कुर्युः साधयेयुरित्यर्थः। तुशब्दस्तु साधनादिषु विशेषं दर्शयति। आधानेऽग्नीनां साध्यत्वेन सम्बद्धानामेव साध्यत्वम्। इष्टिषु साधनत्वेन सम्बद्धानामपि कल्पनागौरवभयात् साध्यत्वमिति विशेषं गृह्णीमः एवं यद्याधानेनेष्टिभिश्चाग्नय एवांशतः साध्या इत्यनधिकाराणां कथमनुष्ठानसिद्धिरिति न्यायाविदामेष उपालम्भो नास्माकम्। अस्माकं तु साध्यसाधनसम्बन्धेऽवगते तदर्थिनां कर्त्तृत्वेनावगतानां ब्राह्मणादीनां कथञ्चिदधिकारकल्पनयानुष्ठानसिद्धिः। अथवाऽनधिकाराणामनन्यशेषाणामपि तत्साधनसाध्यरूपेणोपकारकत्वेन कामं श्रुतिप्रयुक्त्यैवंविधानामनुष्ठानसिद्धिरित्यलमतिविस्तरेण" नारा० वृत्तिः। ""प्रथमायामग्निरग्निः पवमानः" १९ सू०। "प्रथमायामिष्टौ द्वे देवते। अग्निः प्रथमः केवलः। द्वितीयः पवमानगुणकोऽग्निः। केवलस्याग्नेर्नित्ये एव। "अग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः" २० सू०। "एते द्वितीयस्य पवमानगुणकस्य" वृ०। "स हव्यवाडमर्त्योऽग्निर्होता पुरोहित इति स्विष्टकृतः संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्" २१ सू०। "सौविष्टकृत्योर्याज्यानुवाक्ययोर्वचोरनेन संयाज्ये इति संज्ञा विधीयते" वृ०। "सर्वत्र देवतागमे नित्यानामपायः" २२ सू०। "सर्वत्रेति प्रकरणान्तरेऽपीति दर्शयति। देवतागम इत्यत्र समासनिर्देशस्य तुल्यत्वाद्देवतायाः देवतयोर्देवतानां वा आगम इत्येवं भवति। नित्यानां प्राकृतीनामित्यर्थः। अपाय उद्धार इत्यर्थः। एतदुक्तं भवति। विकृतौ देवतायाः एकस्या आगमे द्वयोर्बह्वीनां वा अनागमेऽपि प्राकृतीनां सर्वासामुद्धार इति यां पुनर्विकृतौ इष्टिनोदनां कृत्वा देवतां न विदधाति, तत्र नोद्धारः प्राकृतीनाम्। तत्र ता एव देवता भवन्तीत्यर्थः। यथा गदितः सोमेन पशुना इष्ट्या वा इत्यादौ" वृ०। "याः स्विष्टकृतमन्तराज्यभागौ च तास्तत्स्थाने" २३ सू०। "नित्यानामपाय उक्तः। तत्र किं सर्वा नित्या उद्धर्त्तव्याः उत काचिद्देवतेत्येतं संशयं निवर्तयति या आज्यभागौ स्विष्टकृतं चान्तरा देवता यष्टव्याः ता उद्धर्त्तव्याः। याः पुनर्विकृतौ विहितास्तास्तत्स्थाने उ-